


# SAMSKRITAM AS A FOREIGN LANGUAGE (SAFL)

**NEWSLETTER**

**October 26, 2018**

IN THIS ISSUE

SAFL Entering 10th Year

Important Dates

सुभाषितम्

Students Corner

## SAFL Entering 10th Year

Namaste,

The 2018-2019 academic year marks the beginning of the 10th year of the Samskritam as a Foreign Language (SAFL) program. Looking back, we have come a long way from the pilot project that we had embarked on during the Fall of 2009. The initial idea for SAFL was inspired in response to interest shown by a group of enthusiastic students who wanted to connect their culture and roots from India with their academic experience in the United States.

Learning that these students had requested a rigorous Samskritam curriculum which challenged them in the same manner as their existing language classes, coupled with their parents' desire to attain accreditation for Samskritam classes inspired me to work with Sowmya Joisa to create the original SAFL syllabus.

Sowmya and I both learned conversational Samskritam via Samkrita Bharati's tried and true method - attending in-person classes. With SAFL, we were challenged with creating an online course for high school students. To create the curriculum, we spent months researching existing high school foreign language textbooks, multimedia resources, and teaching plans. Yet, there was one element missing, which we felt was essential, i.e. in-person interaction and practice. We added yuva-shibiram as part of the course requirements to enable student interaction in Samskritam, create bonds that extend past the classroom and celebrate their shared passion for the ancient roots that Samskritam provides access to.

While many elements of the original curriculum like yuva-shibiram remain a constant feature, teachers and supporters of the SAFL program have produced relevant materials with careful thought and intention such as our textbooks Mukulam, Kusumam and Saurabham. I am always personally inspired by the students who attend class on day one with hesitation and curiosity for what lies ahead and walk away with a sense of fulfillment and accomplishment at the end of the 3 years. Each year these SAFL students remind me why my passion for sharing knowledge has never diminished over the years.

जयतु संस्कृतम् !

Vrunda Desai
SAFL Teacher since 2009

# IMPORTANT DATES




## First Semester - Fall 2018

Sept 8 - 11, 2018 – First day of class (All courses)

Oct 13 - 16, 2018 – Unit Exams – I (SAMS101A/101C/101D/101E/101F/101G/101H)

Oct 20 - 23, 2018 – Midterm Exams (SAMS201A/201B/201C/201D/201E/201F/201G/301A/301B/301C/301D/301E)

Nov 17 - 20, 2018 – Unit Exams – II (SAMS101A/101C/101D/101E/101F/101G/101H)

Nov 24 - 27, 2018 – Thanksgiving Break (All courses)

Dec 21, 2018 – Jan 2, 2019 – Winter Break (All courses)

Jan 12 - 15, 2019 – Final Exams (All courses)

## Inter semester break

Jan 19 – 22, 2019 – Inter semester break. No classes (All courses)

## Second Semester - Spring 2019

Jan 26 - 29, 2019 – First day of class

Mar 2 - 5, 2019 – Unit Exams – I (SAMS102A/102C/102D/102E/102F/102G/102H)

Mar 16 - 19, 2019 – Midterm Exams (SAMS202A/202B/202C/202D/202E/202F/202G/302A/302B/302C/302D/302E)

Apr 13 – Apr 16, 2019 – Unit Exams – II (SAMS102A/102B/102C/102D/102E/102F/102G/102H)

May 18 – 21, 2019– Final Exams (All courses)

### REGISTRATION FOR 2019-20

**Registration for Direct Entry Exams opens February 2019 and the exam will be conducted in March 2019. Registrations for SAFL 2019-20 Academic Year opens April 2019. Stay Tuned for Details...**

## सुभाषितम्

न किञ्चित् सहसा कार्यं कार्यं कार्यविदा क्वचित्।
क्रियते चेत् विविच्यैव तस्य श्रेयः करस्थितम्।।

Never should a wise person do work in haste. If done with due deliberation, success is surely assured.

# Students Corner

## मेधाशिबिरम् (July 15-29, 2018)

नमस्ते! मम नाम शर्व दवे। अहं Bloomfield नगरे New Jersey राज्ये दशमवर्गे छात्रः अस्मि। अधुना, संस्कृतभारत्याः कार्यं मया करणीयम्, इति मम इच्छा। २०१५ वर्षस्य वसन्तकाले, अहं SAFL वर्गस्य waiver exam लिखितवान् । तदा तु मया न चिन्तितं यत् कदाचित् अहमपि मम अग्रजा इव बेङ्गलूरु नगरं गमिष्यामि, मेधा-शिबिरे बहु आनन्देन हिन्दुधर्मस्य मातृभाषायाः (संस्कृतस्य) पठनं करिष्यामि।किन्तु, इदानीं , यदा मया एतत् लेखनीयं अस्ति, तदा अहं मेधा शिबिरमपि समापितवान् | सर्वं बहु शीघ्रमेव समाप्तम् इति बहु दुःखितः अस्मि |अहं मम संस्कृतशिक्षकेभ्यः धन्यवादान् वक्तुमिच्छामि। न केवलं न्यू जर्सी राज्यस्य उत्तमेभ्यः शिक्षकेभ्यः, किन्तु विश्वस्य सर्वेभ्यः शिक्षकेभ्यः अपि धन्यवादान् निवेदयितुम् इच्छामि।

ग्रीष्मकाले, मुम्बई नगरस्य विमानपत्तने, हस्ते विमानयात्रापत्रेण , पार्श्वे यानपेटिकया सह अहम् एकाकिना प्रथमवारं विमानेन बेङ्गलूरु नगरं गन्तुं सिद्धः आसम्। "अक्षरं कथं भविष्यति? मम मित्राणि तत्र भविष्यन्ति वा? विमानस्य भग्नं तु न भविष्यति खलु ? मेधा शिबिरं कथं भविष्यति? बेङ्गलूरु नगरे अहं लुप्तः न भविष्यामि खलु ?" एतत् सर्वं मम मनसि चिन्तितवान्। विमाने किन्तु मम पार्श्वे माता, पिता, सहोदरी च न आसन् । सत्यम्, अहमेव उक्तवान्, "अहम् एकाकिना गन्तुमिच्छमि", किन्तु तदा तु अहं बहु अधीरः न आसम्। भवतु नाम, कथञ्चन बेङ्गलूरू विमानपत्तनं प्राप्य अक्षरं गतवान्।

मेधा शिबिरस्य वर्णनम् अहं एकेन शब्देन कर्तुं न शक्नोमि। प्रथम-दिनतः अन्तिमदिनपर्यन्तं, बहु आनन्देन वयं पठितवन्तः, क्रीडितवन्तः, संस्कृतेन सम्भाषणं कृतवन्तः च ! प्रतिदिनम्, उत्थाय योगासनेन दिनस्यारम्भं कृतवन्तः। रुचिकरं प्रातराशं कृत्वा, सर्वे छात्राः प्रथमकक्षायाः आरम्भं कृतवन्तः। प्रतिकक्ष्यायां, कश्चित् शिक्षकः अथवा काचित् शिक्षिका आगत्य संस्कृतस्य अथवा हिन्दुधर्मस्य/ भारतस्य संस्कृतिविषये भाषणं करोति स्म । उदाहरणार्थम्, एकस्मिन् दिने, अस्माकं साहित्यशिक्षिका रघुवंशस्य कथां कथितवती । अन्यस्मिन् दिने, कश्चित् महोदयः नक्षत्रशास्त्रविषये भाषणं कृतवान्। एवमेव, प्रतिदिनं भारतस्य संस्कृतिविषये भाषणं भवति स्म । व्याकरणविषयम् अपि पाठितवन्तः। उत्साहेन, वयं साहित्यविषये, व्याकरणविषये च पठितवन्तः।

तत् पश्चात्, सर्वे छात्राः भाषाक्रीडासमये संस्कृतभाषायाः पठनं क्रीडारूपेण कृतवन्तः। सायं किञ्चित् विश्रान्तिं स्वीकृत्य, सर्वे मेधाछात्राः भजनकार्यक्रमं गतवन्तः। शिबिरे छात्राणां चत्वारः गणाः आसन् - नैशधीयचरितम्, रघुवंशं, कुमारसम्भवं, किरातार्जुनीयं। प्रतिदिनं प्रतिगणं किञ्चित् कार्यं आसीत्। उदाहरणार्थं, रघुवंशगणः भजनसमये भजनद्वयं गापयति, अन्यः गणः अन्यत् कार्यं करोति स्म इत्यादि। भजनकार्यक्रमानन्तरं भोजनम् आसीत्। भोजनसमये एकः गणः परिवेषणं करोति स्म । भोजनं कृत्वा, किञ्चित समयं यावत् मनोरञ्जनकार्यक्रमार्थं सिद्धता भवति स्म | तदा प्रतिगणं रूपकम् अथवा भजनं प्रदर्शयति स्म । मनोरञ्जनकार्यक्रमे, emcee कार्यं छात्रैः एव कृतम् | कार्यक्रमे, महता आनन्देन सर्वे जनाः (छात्राः, शिक्षकाः, कार्यकर्तारः, प्रौढाः) उत्साहेन मनोरञ्जनं पश्यन्ति स्म । एतस्मिन् समये, वयम् आनन्देन स्वकीयानि नाटकानि प्रदर्शयितुं शक्तवन्तः। यदाकदापि अधुना अहं मेधाशिबिरस्य विषये चिन्तयामि, निश्चयेन मनोरञ्जनकार्यक्रमस्य विषये चिन्तनं करोमि। मेधाशिबिरे, सर्वेषां छात्राणां शिक्षकाणां च मध्ये कुटुम्बभावः आसीत्।

यदि कोऽपि अधुना चिन्तयति "अहं SAFL वर्गं गच्छामि वा ? मेधा शिबिरं गच्छामि वा ?" इति, तर्हि तान् अहं वक्तुमिच्छामि, "निश्चयेन करोतु! बहु सम्यक् अनुभवः अस्ति"। संस्कृतस्य पठनं/कार्यं अस्माकं कृते उत्तमःअस्ति! पृथिव्यां केवलम् एकः देशः अस्ति यत्र हिन्दुधर्मः बाहुल्येन अस्ति। अतः गर्वेण करोतु अस्माकं धर्मस्य संरक्षणम्! अधुना, अहं संस्कृतभारत्याः कार्यं कर्तुमिच्छामि। यत्किमपि अस्ति, बालकेन्द्रे अथवा कार्यालये, अहं संस्कृतप्रजालोके भवितुमिच्छामि! मेधाशिबिरं गत्वा, SAFL वर्गं समाप्य, अहं प्रतिदिनं चिन्तयामि यत् - यदि सर्वे जनाः केवलम् एकवारं संस्कृतभारत्याः कार्यं कुर्वन्ति, तर्हि वयं संस्कृतभाषां शीघ्रमेव प्रसारयितुं शक्नुमः । अतः मेधाशिबिरं मह्यं बहु अरोचत। न केवलं संस्कृतस्य विषये पठितवान्, किन्तु धर्मस्य विषये अपि ज्ञातुं शक्तवान्। उत्तमः अनुभवः आसीत्, अतीव उत्तमः!

अन्ते, अहं वक्तुमिच्छामि - "आगच्छन्तु ! वयं सर्वे संस्कृतस्य प्रसारं कुर्मः, संस्कृतभारत्याः कार्यं कुर्मः!"

जयतु संस्कृतम्! जयतु मनुकुलम्!

भवदीयः,
शर्व दवे
SAFL Class of 2018
Bloomfield, New Jersey

## श्रद्धा शिबिरम् (JULY 8-14, 2018)

My first introduction to the SAFL program was the Shraddhaa camp in New Jersey. It was a very unique experience for me. It was the first time that I was away from home for a prolonged period of time without an adult my parents knew. I was slightly afraid at first but as soon as I overcame my initial awkward feelings I fell in love with Shraddha.

My favorite parts of Shraddhaa were the classes and the manoranjana karyakrama. I cherished the fact that we were able to learn a portion of the syllabus in Shraddhaa camp before SAFL classes even started. It is extremely helpful now because I can spend less time actually learning and more time reviewing my lessons. I also really enjoyed the manoranjana karyakrama because not only was it entertaining but it also helped us learn more Sanskrit vocabulary.

I also adored the way the coordinators took care of our basic needs. Everything from our dorms to the food was very well taken care of. The friendliness of our teachers helped us all forget that we were away from home.

The actual SAFL classes are also very enjoyable. I appreciate the way our teachers explain the material to us with the use of multiple visuals. I also appreciate how open they are to questions no matter how big or small it may be. I also appreciate the fact that due to the classes being completely recorded I can easily go back to the class for reference. I adore the fact that the homework and tests are very simple so that we need not spend hours on end doing homework or taking a test.

On the whole, I cherish the structure and facilities of the entire SAFL program. I look forward to going to Shraddhaa next year and continuing to expand my ever growing knowledge of Samskritam.

*Sumedha Surubhotla*
*SAFL 100 Level student*

## श्रद्धा शिबिरम् (JULY 8-14, 2018)

This is my first year doing SAFL and I am already loving it. Ever since I was little, my parents have taken me to various Samskritam camps, but I have never continued to use the language until SAFL.

When I went to Shraddha, my knowledge of Samskritam was very limited. The only things I knew how to say were "namaste," "bhavatyAH nAma kim?" and "dhanyavAdaH." Throughout the week, I learned so much! The classes everyday were very interesting and allowed me to learn very quickly. Before long, I could speak in full sentences and have a conversation in Samskritam!

Shraddhaa Camp was also a great place to make many new friends. Although at the beginning, everyone was a little nervous and homesick, by the end none of us wanted to leave such a great camp that allowed us to be immersed in our own culture and religion, or say goodbye to our Samskritam families.

Shraddhaa was one of the best experiences of my life, and I cannot wait to go there for two more years. Now, we are all studying in our SAFL classes, and although I am a bit nervous for the tests, I know that by the end of the year, I will appreciate all that I have learned and the teachers that have helped me succeed.

*Ankitha Vinod*
*SAFL 100 Level Student*

# SAFL - अनुभवकथनम्

नमस्ते । मम नाम निवेदिता । अहं नवमे वर्गे पठन्ती अस्मि । अहं SAFL 300 स्तरे छात्रा अस्मि । एतावत् पर्यन्तं मम SAFL अनुभवः अतीव सम्यक् अस्ति । यदा अहं गतवर्षं SAFL आरब्धवती, तदा मम संस्कृतस्य सम्भाषणस्य, लेखनस्य, व्याकरणस्य, इतोपि अनेकानां विषयानां ज्ञानं बहु न्यूनम् आसीत् । अहं संस्कृतं वक्तुम्, पठितुम्, च अतीव कष्टम् अनुभवामि स्म । मम SAFL पठनस्य आरम्भस्य अनन्तरम् एव अहं सरलतया संस्कृतभाषायां सम्भाषणं कर्तुम् शक्तवती । SAFL वर्गेषु शिक्षिकाः बहु उत्तमरीत्या पाठयन्ति। तेषाम् पाठनरीतिः अतीवसरला अस्ति, अतः वर्गे सर्वे छात्राः पाठ्यांशान् अवगन्तुं शक्नुवन्ति । यदि कोपि न अवगच्छति, तर्हि ते शान्ततया उत्तरं ददति । ज्ञानवर्धनार्थं प्रतिसप्ताहं गृहपाठः भवति । गृहपाठस्य अतीवः उपयोगः वर्तते। गृहपाठेन तस्य सप्ताहस्य पाठानां पुनरभ्यासः भवति ।

SAFL पठनेन न केवलं संस्कृतज्ञानस्य वर्धनं भवति, किन्तु अस्माकं संस्कृतेः विषये अपि ज्ञानं वर्धेत। कक्ष्यायां वयं व्याकरणेन सह भारत-देशस्य इतिहासान्, उत्सवान्, कवीन्, ऋषीन्, देवान्, च, इतोपि अनेकान् विषयान् पठामः । SAFL पठनेन अहं शास्त्राणां (गणितशास्त्रं, नाट्यशास्त्रं, इत्यादीनि )काव्यानां च परिचयं प्राप्तवती । एतस्मिन् वर्षे इतोऽपि ज्ञानवर्धनं भवेत् इति मम इच्छा ।

*Niveditha Iyengar*
*SAFL 300 Level Student*

## SAFL Summer Camps 2018



Shraddhaa Shibiram July 2018


Prajnaa Shibiram June 2018



SAMS203 Class Prajnaa Shibiram June 2018





Medha Shibiram July 2018

Newsletter

SAFL

Samskrita Bharati

2068 Walsh Avenue, Suite B2,
Santa Clara CA 95050

**Contact:**
**safl.samskritabharatiusa.org**
**safl@samskritabharatiusa.org**
**408 752 2182**